International Journal of Sanskrit Research 2021; 7(6): 05-10

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2021; 7(6): 05-10
© 2021 IJSR
www.anantaajournal.com
Received: 04-09-2021
Accepted: 09-10-2021

**Dr. Girijaprasad Shadangi**
Department of Samaveda, Sri Venkateswara Vedic University, Tirupati, Andhra Pradesh, India

**Corresponding Author:**
**Dr. Girijaprasad Shadangi**
Department of Samaveda, Sri Venkateswara Vedic University, Tirupati, Andhra Pradesh, India

# Pratisakhya text of Samaveda

## Dr. Girijaprasad Shadangi

### प्रस्तावना

नीलोत्पलदलाभासः सामवेदो हयाननः।
अक्षमालान्वितो दक्षे वामे कम्बुधरस्स्मृतः।।

चतुर्षु वेदेषु सामवेदः प्रमुखं स्थानं वहति । "सामानि यो वेत्ति स वेदतत्त्वम्"इति वचनात् ज्ञायते यत् सामवेदः सर्ववेदप्रधानः इति । गीतायां स्वयं भगवान् श्रीकृष्णः उक्तवान् यत् "वेदानां सामवेदोऽस्मि"इति । यः जागरणशीलः पुरुषः स एव सामगानं कर्त्तुं समर्थः भवति । यथोक्तं - "यो जागार तम् ऋचः कामयन्ते, यो जागार तमु सामानि यन्ति"इति । एवं प्रथितमहिमा सामवेदः सहस्रशाखात्मकः, तदेवोक्तम् भगवान् पतञ्जलिः स्वीये महाभाष्ये "सहस्रवर्त्मा सामवेदः" इति । चरणव्यूहादि ग्रन्थेषु सामवेदस्य त्रयोदशशाखाः लभ्यन्ते । परन्तु सम्प्रति शाखात्रयमेव समुपलभ्यते । यथा – कौथुम, राणायनी, जैमिनी इति ।

Among the four Vedas Samaveda has the main place. "सामानि यो वेत्ति स वेद तत्तम्" means who knows samans they know all Vedas. In Bhagavadgeeta Lord Sri Krishna said that in vedas he is Samaveda. The punctual persons are eligible for reciting samagana. Pantanjali quoted in his Mahabhashya "chanting of samaveda has thousand types". Presently three chanting types are being used. They are known as Kouthuma, Ranayani and Jaimini.

वेदशाखानां रक्षणाय महर्षिभिः वेदाङ्गानि, नैके शास्त्राणि, शिक्षाप्रातिशाख्यादि-लक्षणग्रन्थाश्च आरचिताः। यत्र मन्त्रानाश्रित्योच्चारणप्रक्रिया शिष्यते निरूप्यते स एव लक्षणग्रन्थः इति । लक्षणग्रन्थाध्ययनेन वैदिकमन्त्राणां यथाविध्युच्चारणं सुलभतरं भवति । स्वरवर्णमात्राकालाद्यवगमनाय, सुस्वरेण सम्यगुच्चारणाय, उच्चनीचादि-विवेचनाय, अक्षराणां सन्धिलोपागमविकारविवेचनाय च उपकाराः भवन्ति । लक्षणज्ञानरहितं वेदाध्ययनं निष्फलमिति भगवता वेदव्यासेन निरूपितम् । उक्तञ्चव्यासशिक्षायाम् –

For the protection of Vedas, sages created vedangas. Shiksha and pratishakhya, granthas are more important texts to protect the Vedas. In shiksha, it is given how to pronounce mantras, how to chant in low and high pitches and discussed on sandhi, lopa, agama & vikara etc. "Without the knowledge of Lakshna granthas study of Vedas is worthless" said by Vedavyasa. In shiksha it is mentioned.

लक्षणेन विनाध्ययनं यः पठेदपि सर्वदा ।

नैव तत्फलमाप्नेति सविप्रस्सुजनोऽपि हि।

**सामवेदीयलक्षणग्रन्थाः** (Lakshyagrantha of Samaveda)

सामवेदार्चिकानां साम्नां च लक्षणनिरूपणार्थं बहवो ग्रन्थाः प्रणीताः । तेषु नारदीयशिक्षा, गौतमीयशिक्षा, लोमशीयशिक्षा इत्यादि शिक्षाग्रन्थाः । एवमेव ऋक्तन्त्रम्, सामतन्त्रम्, अक्षरतन्त्रम्, पुष्पसूत्रम् इत्यादयो प्रातिशाख्यग्रन्थाः, तथा गायत्रविधानम्, लघु ऋक्तन्त्रसंग्रहः, ऋक्तन्त्रविवृतिः, सामतन्त्रप्रकाशिका, सामतन्त्रसंग्रहः, आर्षेयदीपिका, मात्रालक्षणम्, आर्चिकलक्षणम्, आर्चिकछलाक्षरम्, इत्यादयो लक्षणग्रन्थाः सुप्रसिद्धाः । सम्प्रति एतेषां ग्रन्थानां परिचयात्मकं विवरणं किञ्चिदत्र प्रदीयते ।

In Samaveda, for rik and sama many lakshana granthas were written by sages. They are Naradiyashiksha, Goutamiya siksha, Lomashiya siksha, Riktantram, Samatantram, Aksharatantra, Pushpasutram, Gayatravidhanam, Laghuriktantra sangraha, Riktantravivrutti, Samatantra prakashika, Sama-tantrapotam (sangrah), Arsheyadeepika, Matralakshnam, Archikalakshnam and Archika chalaksharam are famous. Their brief description are given below.

## 1. नारदीयशिक्षा - Naradiyasiksha

ग्रन्थस्यास्य कर्ता भवति नारदः। नारदेन प्रणीतत्वात् अस्य ग्रन्थस्य नारदीयशिक्षा इति प्रसिद्धिः। ग्रन्थोयं प्रपाठकद्वयेन षोडशखण्डात्मिकः वर्तते । अस्मिन् षोडशेषु खण्डेषु बहवो विषयाः निरूपिताः। तेषु आर्चिकसामिकगाथिकभेदेन स्वराणां त्रैविध्यम्, चतुर्दश गानदोषाः, तेषां लक्षणानि, हस्तसन्निवेशप्रकारः, अङ्गुल्या स्वरनिर्देशः, क्रुष्टादिस्वराणां मूर्धादिस्थानादुत्पत्तिः, सप्तविधस्वरितनिरूपणम्, कम्पविधिः, गुरुशिष्ययोः लक्षणं, विद्यादाने अपात्रनिरूपणम् इत्यादयः प्रसिद्धाः। ग्रन्थस्यास्य अध्ययनेन ब्रह्मलोकप्राप्तिः इत्यन्ते निरूप्य ग्रन्थसमाप्तिः कृतः। उक्तञ्च - "एवं वर्णाः प्रयोक्तव्याः नाव्यक्ता न च पीडिताः। सम्यक् वर्णप्रयोगेण ब्रह्मलोके महीयते । इतिअयं ग्रन्थः भट्टशोभाकरकृतव्याख्यया, श्रीनारायणस्वामिदीक्षितेन विरचिता प्रकाशाख्यटिप्पण्या उपलभ्यते ।

Naradiya siksha expound the lakshana of Sama and Rik. Author of the book is Narada Maharshi. That's why it's called Naradiyashiksha. The text contains 2 prapathakas, 16 khandas and 283slokas. In this, archika-samika-gathika swaras, 14 errors [ganadosha] of samagana, their lakshanas, hastaswara styles, anguliswara style, origin of kristaswaras, representation of seven types of swarita swaras, way of kampa swaras, nature of guru and shishyas, eligibility of vidyadanam etc. commentary by narayanaswamy deekshit and vivarna by Bhattashobhakar.

## 2. गौतमीयशिक्षा - Gautameeiyasiksha

गौतममहर्षिणा रचितोऽयं ग्रन्थः। ग्रन्थस्यास्य संयोगश्रृङ्खला इति नामान्तरमप्यस्ति । ग्रन्थेऽस्मिन् षोडशखण्डाः सन्ति । ग्रन्थादौ त्रयस्त्रिंशत् (33) व्यञ्जनभेदाः निरूपिताः । यथा – पञ्चविंशतिस्पर्शाः (25), चत्वारः अन्तस्थाः (4), चत्वारः ऊष्मवर्णाः (4) आहत्य त्रयस्त्रिंशत् । एतादृशः इतोपि बहवो विषयाः उपनिबद्धाः दृश्यते ।

Gautamiya Siksha is written by Gautuma maharshi. This book's another name is sanyoga srinkhala. In this there are 16 khandas. In the starting, 33 types of consonants they are 25 touch charterers, 4 antastha varnas [end charterers], 4 ushma varnas like this many topics are described.

## 3. लोमशीयशिक्षा - Lomaseeyasiksha

"लोमशीयशिक्षा प्रवक्ष्यामि गर्गाचार्येण चिन्तिताम्"इति शिक्षावचनात् ज्ञायते यत् ग्रन्थास्यास्य कर्ता गर्गाचार्यः इति। अष्टखण्डात्मिकोऽयं ग्रन्थः। ग्रन्थेऽस्मिन् स्वरविशेषाः, तेषां उच्चारणप्रकाराः, द्विविधरङ्गः, अनुनासिकोच्चारणप्रकारः, अक्षराणां द्विर्भावः, अणुमात्रादीनां स्थाननिर्देशः, इत्यादयो विषयाः निरूपिताः।

Lomashiyashikha is written by Gargacharya. In this grantha there are 8 khandas. This siksha deals with aspects of swaras and modes of their utterance.

## 4. गायत्रविधानम् - Gayatravidhanam

शुङ्गाचार्य कृतं गायत्रविधानम्। अत्र त्रयः खण्डाः वर्तन्ते। अस्य ग्रन्थस्य व्याख्या विद्यते इति श्रूयते किन्तु नोपलभ्यते । अत्र प्रतिपाद्यविषयाः यथा सामसु प्रस्तावः, उद्गीथः, प्रतिहारः, उपद्रवः, निधनादि भक्ति विशेषाः । गायत्रसाम्नः तद्विविद्वा स्वरः प्रस्तावः। प्रथमस्वरः एव प्रस्ताव इत्यर्थः। स च प्रथमपादस्याक्षरमात्रे गीयते। तानि च अक्षराणि गायत्री छन्दसि

अष्टौ, जगत्यां द्वादश भवन्ति । सर्वेष्वपि छन्दस्सु अष्टाक्षराणि प्रस्तावः अवशिष्टानि उद्गीथे योजयेत्। प्रस्तावभक्तिः ओकारान्ता प्रयोक्तव्या। उद्गीथभक्तिः सर्वापि निरुच्छ्वासं गातव्या। यदि न शक्यते तदा प्रथमखण्डमात्रं तथा गातव्यम्। खण्डत्रयात्मिका उद्गीथभक्तिः। हिम् आ इति प्रतिहारः। सोपि उद्गात्रा गेयः। प्रतिहर्ता तु मनसा ध्यायेत्। कामनानुसारेण निधनभक्तिर्भेदः। अत्र अक्षरन्यूनतायां यकार वकारयोः विकर्षप्रकारः। एवं गायत्रसाम्नः विशेषान् अत्र विशदयित्वा सामान्तराणामपि कतिचनविशेषाः प्रतिपाद्यन्ते ।

Gayatra vidhana by Shungacharya deals with samas relating to gayatri and has three khandas. Commentary of this book is there but not published or available. Subject of this book is prastava bhakti, udgitha bhakti, pratihara bhakti, upadrava bhakti, and nidhana bhakti. In the gayatra sama Tatvividda swara is prastava bhakti. Prathama swara is known as prastva bhakti etc.

### 5. ऋक्तन्त्रम् - Riktantram

ग्रन्थस्यास्य कर्ता शाकटायनः। केचन औदव्रजीति वदन्ति । अयं ग्रन्थः पञ्चप्रपाठकात्मकः, द्वात्रिंशत्खण्डात्मकः। एकैकस्मिन् प्रपाठके प्रायशः सप्तखण्डाः सन्ति । ग्रन्थेऽस्मिन् 286 षडशीत्यधिकशतद्वयं सूत्राणि सन्ति । प्रथमप्रपाठके अक्षराणामुत्पत्तिस्थानानि उत्पत्तिप्रकारः तेषां स्वरूपं प्रतिपाद्यते । द्वितीये अक्षराणां स्थान, स्वर, मात्रा निर्णयः क्रियते । तृतीये तेषां संहिता सन्निकर्ष विकाराश्च उद्यन्ते । चतुर्थे विसर्गस्य सकारः, लोपः अन्यस्य वर्णस्य वर्णान्तरत्वम् इत्यादि । अस्य ऋक्तन्त्रव्याकरणमिति व्यवहारो विद्यते । लौकिकव्याकरणसूत्रात् लघुभूतानि सूत्राणि अत्र भवन्ति । यथा लृतुलसानां दन्ता स्थाने दन्तेत्स्लाः इति । अथ वाचो वृत्तिं व्याख्यास्यामः इत्यारभ्य षाद्दन्त्यः सूत्रे समाप्यते। अयं ग्रन्थः सामवेदीय आर्चिकस्य प्रातिशाख्य ग्रन्थरूपेण सर्वविदितः।

Riktantra by Sakatayana maharshi deals with lakshanas of the archikas and is in five prapatakas topics like origins of sounds of language their swarup, samhitalakshna sannikarsha aksharas etc, are covered. 286 slokas are there. First prapathak describes the procreation of letters. Placement of letters, vocal and matras are in second prapathak. Third prapathak deals with sannikarsha and vikaras. In fourth prapathak, lopa, SA karah, varnasya varnantara are given. In the last i.e. in fifth prapathak, dirgha swarupam and murdhanya bhava are given.

### 6. लघुऋक्तन्त्रसंग्रहः- Laghuruktantrasangraha

ग्रन्थस्यास्य कर्ता शाकटायनः। अत्र अष्टपञ्चाशदुत्तरशतं (158) श्लोकाः वर्तन्ते । परन्तु 156 श्लोकाः एव उपलभ्यन्ते । ग्रन्थोयं ऋक्तन्त्रस्थान् विषयान् श्लोकरूपेण विशदयति । प्रकरणारम्भे वक्ष्यमाण विषयान् संगृह्य ज्ञापयति । यथा

दीर्घास्तु संहिताकाले अचो व्यञ्जनपूर्वकाः।
पदकाले प्रपद्यन्ते ह्रस्वतां ये ब्रवीमि तान्।
अच्छा रक्षा श्रुधी रास्वा वहा एह्यूषु युँक्ष्व तु।
अद्या शग्ध्यूष्वा जुहोता तिष्ठा ऊ षु सपर्यया।।

संहितायां दीर्घाणामक्षराणां पदकाले ह्रस्वतां यान्ति। यथा अच्छानम्रे- अच्छ-नम्रे। रक्षाणः – रक्ष-नः। एवं संहितायां ह्रस्वादि पदकाले दीर्घाणि भवन्ति। मह्वृते- मह्वा-ऋते। इत्यादौ ह्रस्वदीर्घत्वे इ उ यण् गुणसन्धयः पूर्वरूपं, प्रगृह्यम्, ओत्वमित्यादयः श्लोकरूपेण प्रतिपादिताः। अन्ते तावत् –

सवर्णस्य यणश्चैव वृद्धेश्चापि गुणस्य वा ।
प्रगृह्यस्य विकाराश्च पञ्चैव परिकीर्तिताः।
लघुऋक्तन्त्रग्रन्थेस्मिन् वनसंख्याकसन्धयः।। इति

This text was composed by Shakatayana. There are 158 slokas present in this text but till date only 156 slokas are avialable now. It prescribes the rules governing the length and shortness chanting of mantras.

### 7. ऋक्तन्त्रविवृत्तिः- Riktantravivruttih

ऋक्तन्त्रविवृत्याख्योयं ग्रन्थः प्रकरणत्रयात्मकः। गायत्रगान-प्रकाराख्य प्रथमप्रकरणे यज्ञेषु बहिष्पवमानाज्यादि स्तोत्रेषु प्रयुज्यमानगायत्रसाम्नः गानप्रकारः, उद्गीथादि भक्तिनिरूपणं कृतम्। द्वितीयप्रकरणे स्वरितनिरूपणं कृतं यथा स्वरितस्य स्वरान्तरत्वेनापरिगणनात्स्वरितं नाम किञ्चन नास्ति । उदात्तानुदात्तयोस्समाहारस्यैव स्वरितस्य व्यपदेशात् । तृतीयप्रकरणे प्रचयस्य एक श्रुतित्वं उदात्तस्वरत्वं प्रमाणपूर्वकं

साधयति। अयं च ग्रन्थः अथ गायत्रगानप्रकारो निरूप्यते इत्यारभ्य आद्यार्धमात्रा एवोदात्ता भवन्तीत्यर्थ एव विवेकः इति समाप्यते ।

Riktantra vivrutthi covers (1) Gayatraganaprakarah (2) swarita nirupanam and (3) ekasruti vidhanam for prachayaswara. This book covers 3 chapters in which above information.

### 8. सामतन्त्रम् – Samatantram

ग्रन्थस्यास्य रचयिता औदव्रजिः। त्रयोदशप्रपाठकात्मकः सामतन्त्राख्यः ग्रन्थः प्रकृतिगान-आरण्यगानयोः मुख्यः लक्षणग्रन्थः। चतुर्दशपञ्चदशप्रपाठकद्वयं अक्षरतन्त्रमिति व्यवहारः। आहत्य सूत्राणि 1311 वर्तन्ते । प्रथमं सूत्रं तावत् स्वरोनन्त्यः इति। अस्मिन् सामतन्त्रे उच्चनीचभावः, गतागतभावः, अम्भावः, सङ्कर्षविकर्षभावः, अतिहारभावः, मिन्भावः, यथर्चभावः, नुभावः इत्यादयः प्रायशः त्रिंशद्भावाः एवं बहुविधगानविशेषाः प्रतिपादिताः।

Samatantra is the lakshanagrantha for prakriti samas and was composed by Audavraji maharshi 13 chapters, 138 khandas and 1311 sutras. Its first sutra is swaroonantyaha. In this, uccha-nichabhava, gatagata bhavah, am bhavah, sankarsha vikarsha bhava, atihara bhava, min bhava, yatharcha bhava, nu bhavah, like this there are 30 bhavas. This text is main lakshana grantha of samagana.

### 9. सामतन्त्रप्रकाशिका - Samatantraprakashika

सामतन्त्रप्रकाशिका नामक ग्रन्थः सामतन्त्रभाष्यस्य विवरणात्मकः। अत्र उदाहरण प्रत्युदाहरणानि विशदरूपेण दर्शयति ।

Samatantra prakasika by Mahaganapati is of the nature of a vivarana of samatantrabhashya.

### 10. सामतन्त्रपोतम् - Samatantrapotam

सामतन्त्रपोतं अथवा सामतन्त्रसंग्रह नामक ग्रन्थः प्रकृति साम्नां ओग्नाइ प्रभृति उन्नयामीत्यन्तानां सूत्रपुरस्सरं साम्नां समन्वयं करोति। यथा ओग्नाइ अस्मिन्पदे ग्नितुडाद्येषु, तत् त्रिमात्रः, असप्तिनः, सर्वोन्तः,एतानि चत्वारि सूत्राणि प्रवर्तन्ते । एवं एकैकं साम लक्षयति ।

Samatantrapotam or Samatantra sangraha epitomizes the sutra for each prakruti Sama.

### 11. अक्षरतन्त्रम् - Aksharatantram

अक्षरतन्त्रग्रन्थस्य कर्ता आपिशलमुनिः। साम्नां स्तोभाक्षरविचारात्मकस्य अक्षरतन्त्रमिति संज्ञा । अत्र प्रपाठकद्वयं (2) षड्विंशतिखण्डाः (26) षष्ठ्यूत्तरद्विशतसूत्राणि (260) च विद्यन्ते। सामतन्त्रस्य शेषभूतोयं ग्रन्थम्। अस्मिन् ग्रन्थे प्रथमखण्डे अक्षराणां संज्ञा, द्वितीयादिषु षड्ड अक्षराणां प्रयोगविधिः, ततः आसमाप्तेः अक्षरगतस्वरवर्णतां विधिश्च निर्दिश्यते। सामसु आर्चिकाक्षरेण गीयमानेषु ऋगक्षरात् अधिकानि कानिचिदक्षराणि सस्वराणि गीयन्ते तानि स्तोभत्वेन प्रसिद्धानि। स्तोभानां प्रयोगपरिज्ञानं एतद् ग्रन्थबोधं विना न संभवति। अस्यादिमं सूत्रम् अनृगाद्यक्षरम् इति । स्तोभाश्च हाउ, होइ, औ, ओ, हो, इट् एवमादयः। एतेषां सामसु प्रवृत्तिः अत्र विचार्यते ।

Aksharatantra 26 khanda 260 sutra covering stobhas of Samaveda. This book was composed by Apishala muni. Stobhas are hau, hoe, ou, o, ho, it, eda, etc. first sutra is anrugadiykharam.

### 12. आर्षेयदीपिका -- Arsheya Deepika

आर्षेयदीपिका ग्रन्थोयं ग्रामगेय आरण्यगेययोः विद्यमानानां ऋचां साम्नां च क्रमेण ऋषीन् ज्ञापयति । यद्यपि आर्षेय ब्राह्मणेन ज्ञातुं शक्यते । तथापि तत्र बहवः ऋषयः बह्व्यश्च देवताः ज्ञाप्यन्ते तेषां निर्धारणे क्लेशो भवति । तादृश क्लेशं विना एकैकस्य साम्नः ऋषिरयमिति निर्णयति अयं ग्रन्थः। तद्वत् देवता विषयेपि । अग्न आया हि इत्यस्या ऋच- भरद्वाजऋषिः। तत्साम्नां प्रथमस्य पर्कस्य गौतमः एवं प्रकारेण ऋषिछन्द देवताविषये स्पष्टयति ।

In Arsheya Deepika, Gramageya and Aranyakageyas Rik and Sama's Sages are told. If also we could have known from Arsheya brahmana but here it is given very clearly. Not only Rishis about Gods are also given.

### 13. नैगम् - Naigam

नैगाख्योयं ग्रन्थः प्रपाठकद्वयात्मकः। प्रथमे प्रपाठके पूर्वार्चिकानां उत्तरार्चिकानां च प्रत्येकं ऋषयः प्रोच्यन्ते। द्वितीये प्रपाठके पूर्वोत्तरार्चिकानां पृथक् देवता निर्दिश्यति। ग्रन्थस्यास्य प्रारम्भः – अथार्षमार्चिकस्याग्ने त्वमग्नेग्निः इति । अस्य नैगेयम् नैगेयार्चिकमिति नामान्तरं विद्यते ।

There are Two Prapathakas in the Naigam Grantha. In fast Prapathaka Purvarchika and Uttarachikas Rishis are said. In second prapathakas each mantras described the God. The other names of this grantha are Naigeyam and Naigeyarchikam.

## 14. सामवेदसप्तलक्षणम् - Saptalakshanam

सप्तलक्षणमिति आर्चिकानां लक्षणग्रन्थः। अस्य कर्ता नारायण पण्डितः। अत्र प्रकरणानि सप्त, श्लोकाश्च (138) अष्टत्रिंशदुत्तरशतसंख्याकाः । ग्रन्थस्यास्य प्रतिपाद्यविषयस्तावत्- प्रथमद्वितीयप्रकरणौ विसर्गलोपालोपौ, तृतीये रङ्गम्, चतुर्थे विलिङ्घ्यम्, पञ्चमे नपर तपरे, षष्ठे अवर्णि, सप्तमे अनवग्रहः अनिङ्घ्यम्। ग्रन्थे अस्मिन् पारिभाषिकशब्दाः बहवो सन्ति ।

Saptalakshanam is Archika mantras Lakshana Grantha. This grantha composed by Narayana Pandit. Here seven Prakaranas and 138 Slokas. In first and second prakarana Visarga lopalopa, third Rangam, fourth viligghyam, fifth n-para and t-para, six Avarni, seventh anavagraha and anigghyam. Many Paribhashika sabdas are there.

## 15. मात्रालक्षणम् - Matra lakshanam

मात्रालक्षणग्रन्थस्य कर्ता वररुचिः। अत्र खण्डिकात्रयं 56 सूत्राणि भवन्ति। मात्रा नाम कालविशेषः। वेदाक्षराणामुच्चारणसमये कालस्य परिच्छेदो विद्यते। आर्चिकानां साम्नां च मात्रा नियमः अत्र प्रतिपाद्यते । ग्रन्थस्यास्य प्रारम्भः अथातो "ह्रस्वदीर्घप्लुतमात्राण्यक्षराणि व्याख्यास्यामः" इति । "सामसु अर्धमणुमात्रम्। ह्रस्वं मात्रा । दीर्घं द्वे । प्लुतं वृद्धं चेत् त्रिमात्रमभिधीयते" । इति ।।

Matra lakshana prescribes the rules governing length and shortness in Sama chanting. It was composed by Vararuchih. It has 56 sutras.

## 16. सामधारणलक्षणम् - Samadharana lakshanam

अस्य कर्ता सभापतिः। जैमिनीयसामगानां प्रणां विमर्शनं अत्र क्रियते। श्लोकात्मकोयं ग्रन्थे 75 पञ्चसप्ततिः श्लोकाः सन्ति। स्वरं सप्तविधः प्रोक्तम् इत्यारभ्य जैमिनीयशाखायां वेदवित्तमैःकति आरण्यक साम्नां हस्तस्वरादिविषये लक्षणमत्र विद्यते। अवरोह, उद्गम, यानम्, आवर्तः, क्षेपणम्, मर्शनम्, अवरुह्यक्षेपणमित्यादि स्वरा इत्यन्तम् उपलभ्यते ।

Samadharana Lakshana book is Jaiminiya sakhas lakshanam. Auther is Sabhapati. It has 75 slokas. Avaroha, Udgama, Yanam, Avarta, Kshepanam, Marshanam, Avaruhyakhepanam etc are explained.

## 17. पुष्पसूत्रम् – Puspasutram

भगवता वररुचिना आरचितमिदं पुष्पसूत्राख्यं लक्षणग्रन्थम् । दशप्रपाठकात्मकोऽयं ग्रन्थः। श्रौतयागेषु ग्रन्थस्यास्य भूयान् उपयोगः दृश्यते। तथाचोक्तम् – अयज्ञो वा एष योऽसामा इति । ग्रन्थेऽस्मिन् प्राधान्येन अष्टादशभावाः निरूपिताः। यथा –

आइत्वं प्रकृतित्वञ्च वृद्धं चावृद्धमेव च । गतागताच स्तोभानां उच्चनीचं तथैव च ।।
सन्धिवत्पदवद्वानं अत्वमार्भावमेव च । प्रश्लेषश्चाथविश्लेषा ऊहेत्वेवं निबोधत ।।
संकृष्टञ्च विकृष्टञ्च व्यञ्जनं लुप्तमतिहृतम् । आभावाश्च विकाराश्च भावा अष्टादशस्मृताः ।। इति

1. आयिभावः, 2. प्रकृतिभावः, 3. वृद्धभावः, 4. अवृद्धभावः, 5. स्तोभगतागतभावः, 6. उच्चनीच भावः, 7. सन्धिवद्वानभावः, 8. पदवद्वानभावः, 9. अत्वम्, 10. आर्भावः, 11. प्रश्लेषभावः, 12. विश्लेषभावः, 13. सङ्कृष्ट भावः, 14. विकृष्टभावः, 15. लोपभावः, 16. अतिहारभावः, 17. आभावः, 18. विकारभावः ।

This book is composed by Vararuchih. Pushpasutra has 10 chapters, 129 khandas and 3404 sutras. It expounds 18 bhavas, They are Ayibhavah, Prakruti-bhavah, Vrudha-bhavah, Avridhabhavah, Stobha gatagata bhavah, Uchaneeca - bhavah, Sandhivadgana bhavah, Padavadgana bhavah, Atvam, Aar bhavah, Prashlesha bhavah, Vishlesha bhavah, Sankrushta bhavah, Vikrushta bhavah, Lopa bhavah, Atihara bhavah, A bhavah, Vikara bhavah.

## 18. फुल्लपोतम् -- Phullapotam

अस्य ग्रन्थस्य प्रणेतृः गणेशपण्डितः। ऊहरहस्यसामलक्षण- ग्रन्थस्य पुष्पसूत्रस्य व्याख्यारूपं फुल्लपोतम्। अत्र आमहीयवसाम

आरभ्य ऊहरहस्यास्थानां सर्वेषां साम्नां प्रत्येकं विषयीकृत्य एकैकस्मिन् साम्नि यावन्ति सूत्राणि प्रवर्तन्ते तावतां समन्वयः क्रियते। इतोपि प्रस्ताव-उद्गीथ-प्रतिहार-उपद्रव-निधनेषु पञ्चभक्तिषु वररुचेः विरचित पुष्पसूत्रान् उपयुज्य आइभावादि अष्टादशभावादीनां निरूपणं कृतम् । इदं जिज्ञासूनां महते उपकाराय भवति। ग्रन्थस्य प्रारम्भः- वन्दे वररुचिं नित्यमूहाब्धेः पारदृश्वनम् । पोतो विनिर्मितो येन फुल्लसूत्रशतैरलम् इति ।

Pullapotam grantha expounds lakshnas of all the UhaRahasya samas. This book was written by Ganesh pandit.

एतादृशरीत्या सामवेदे बहवः लक्षणग्रन्थाः सन्ति किन्तु अध्ययन अध्यापने तु नारदीयशिक्षा, ऋक्तन्त्रम्, सामतन्त्रम्, पुष्पसूत्रमित्यादि केचन ग्रन्थाः एव सन्ति । परन्तु अत्र विषयवस्तु सामवेदीय शिक्षा तथा प्रातिशाख्यग्रन्थाः कारणात् सामान्यतया परिचयं प्रदत्तम् ।। इति शम् ।।

In this way in Samaveda there are many Lakshana granthas are present. For studying and teaching Naradeeya sikha, Riktantram, Samatantram and Puspasutra are being used. Till now what all things I have told and described are very beneficial to you all.

**Reference**

1. Phullapotam - Edited by Dr. Girijaprasad Shadangi, Published by Ranayaneeya samsodhana Pratisthanam, Tirupati, 2013.
2. Naradeeya shikhya: Edited by Dr. Girijaprasad Shadangi, Tirupati, 2014.
3. Naradeeya shikhya: Edited by Satyabrata Samashrami, Kolkatta, 1947.
4. Naradeeya shikhya: Sri Peetamberpeetha Sanskrit parishad, Datiya, Madhyapradesh, 1964.
5. Riktantram: Dr Suryakanta, Meharchand laxaman das, Delhi, 1970.
6. Riktantram: Edited by Dr Girijaprasad Shadangi, Tirupati, 2018.
7. Laghu Riktantra sangrah: Dr. Suryakanta, Lahore, 1940.
8. Samatantram: A.S. Ramanath Deexit, Kashi Hindu Viswa Vidyalaya, Varanasi, 1961.
9. Matralaxanam: Dr. BR Sarma, Rastriya Sanskrit Vidyapitha, Tirupati, 1970.
10. Puspasutram: Mayuram Ramanatha Deexit, Madras, year
11. Archika laxanam, Avagraha sutra vivaranam, Matrakalah, Chalakshyaram, (Samaveda Padapatha Book Page no 379 to 417) editd by: Edited by Dr. Girijaprasad Shadangi, Tirupati, 2016.
12. Lomasiya shikhya, Goutamiya shikhya, edited by Ramamurthy Srouthy, Sringeri.